४९६८
Shri Raghunatha Temple MSS. Library,
४९५५ JAMMU ४९७०8

No. २५७६ क

Title पंचस्तवी

Author

Extent १२ पत्र Age सं. १९४०

Subject स्तोत्र

५९७०-१९

© Dharmartha Trust J&K. Digitized by eGangotri

नं परट पंचस्तवी नं १२२

पंचस्तवी नं. १५७६

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ९५ ८६

~~पंचस्तवी~~

१२ पत्राणि

स्तोत्र

सं. १९४०

~~#~~ 5974

F — 4

Complete

[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

ॐनमस्त्रिपुरसुंदर्यै ॐऐंद्रस्येवशरासन
स्यदधतीमध्येललाटंप्रभांशौक्लींकांतिम
नुष्णगोरिवशिरस्यातन्वतीसर्वदा एषासौ
त्रिपुराहृदिद्युतिरिवोष्णांशोःसदाहस्थि
ताच्छिंद्यान्नःसहसापदैस्त्रिभिरघंज्योतिर्म
यीवाङ्मयी १ यामात्रात्रपुसीलतातनुलस
त्तंतूत्थितिस्पर्धिनी वाग्बीजेप्रथमेस्थिता
तवसदातांमन्महेतेवयं शक्तिःकुंडलनीति
विश्वजननव्यापारबद्धोद्यमाज्ञात्वेत्थंनपुनः
स्पृशंतिजननीगर्भेर्भकत्वंनराः २ दृष्ट्वासंभ्र
मकारिवस्तुसहसा ऐऐइतिव्याहृतं येना
कूतवशादपीहवरदेबिंदुंविनाप्यक्षरं त
स्यापिध्रुवमेवदेवितरसाजातेतवानुग्रहे वा
चःसूक्तिसुधारसद्रवमुचोनिर्यांतिवक्त्रांबु
जात् ३ यन्नित्येतवकामराजमपरंमंत्राक्षरंनि
ष्कलं तत्सारस्वतमित्यवैतिविरलःकश्चिद्बु

© Dharmartha Trust J&K. Digitized by eGangotri

पं॰ यश्चेन्दुवि म्बाख्यानं प्रतिपर्वसत्यतपसो यत्कीर्त
स्त॰ यंतो द्विजः प्रारंभे प्रणवास्पद प्रणयतां नीत्वोश्च
१ रंति स्फुटं ४ यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्र
भावं बुधैस्तार्तीयीकमहं नमामि मनसा त्वद्बीज
मिंदुप्रभं अस्तौर्वोपि सरस्वतीमनुगतो जाड्यांबु
विच्छित्तये गौः शब्दो गिरि वर्तते स नियतं योगं वि
ना सिद्धिदः ५ एकैकं तव देवि बीजमनघं सव्यंजना
व्यंजनं कूटस्थं यदि वा पृथक्क्रमगतं यद्वा स्थितं व्यु
त्क्रमात् यं यं काममपेक्ष्य येन विधिना केनापि वा।
चिंतितं जप्तं वा सफलीकरोति तरसा तं तं समस्तं
नृणां ६ वामे पुस्तकधारिणीमभयदां साक्षस्रजं
दक्षिणे भक्तेभ्यो वरदानपेशलकरां कर्पूरकुंदो
ज्ज्वलां उज्जृंभांबुजपत्रकांतनयनस्निग्धप्रभालो
किनीं ये त्वामंब न शीलयंति मनसा तेषां कवित्वं कु
तः ७ ये त्वां पांडुरपुंडरीकपटलस्पष्टाभिरामप्रभां
सिंचंतीममृतद्रवैरिव शिरो ध्यायंति मूर्ध्नि स्थितां

© Dharmartha Trust J&K. Digitized by eGangotri

अशांतेविकरस्फुरात्तरपदाद्रियांतिवङ्कांबुजा
नेषांभारतिभारतीस्वरसरित्कल्होलल्लोलामिवत् ८
येस्तिहृरपरागपुंजपिहितांत्वतेजसायामिमा
र्गुर्वीचापिविलीनयावकरसप्रस्तारमग्नामिव
पश्यंतिक्षणमप्यनन्यमनसस्तेषामनंगज्वरा
क्रांतास्त्रलऊरंगशावकदृशोवश्याभवतिस्फुरं ९
चंचत्कांचनकुंडलांगदधराभावद्धकांचीस्रजे
त्वांचेनसितक्षनेक्षणमपिध्यायंतिकृत्वाश्रियंते
नेषांवेश्मसुविभ्रमादहरहःस्फारीभवंतिचिरंमा
द्यत्कुंजरकर्णताललतरलाःस्थैर्यंभजंतिश्रियः १०
आर्भत्साशशिखंडमंडितजटाजूटांनृमुंडस्रजं
वंभकेशसवारुणांवरधरांप्रेतासनाध्यासिनीं
त्वांध्यायंतिचतुर्भुजांत्रिनयनामापीनतुंगस्तनीं
मध्येनिम्नवलित्रयांकितनतुंत्वद्रूपसंवित्तये
गातोपल्पपरिच्छिदेत्तितिभुजांसामान्यमात्रे ११
ऊले निःशेषातनिचक्रवंतिपदवीरज्याश्रतापो

© Dharmartha Trust J&K. Digitized by eGangotri

पं॰ स्त॰ २

न्नतः यद्विद्या परं हृदवंदितपदः श्रीवत्सराजो भव
हे विश्वस्मरणांबुजप्रणतिजः सोयं प्रसादोदयः १२
चेटित्वस्मरणांबुजार्चनविधौ विहीदलोल्लुंठनत्र
स्तंकंठककोटिभिः परिचयं येषां न जग्मुः कराः ते
दंडांकुशपाशचक्रचापकुलिशश्रीवत्समत्स्यांकितैर्जा
यंते पृथिवीभुजः कथमिवांभोजप्रभैः पाणिभिः १३
विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवै
स्त्वां देवि त्रिपुरे परापरमयीं संतर्प्य पूजाविधौ यां यां
प्रार्थयते मनः स्थिरधियां तेषां त एव ध्रुवं तां तां सि
द्धिमवाप्नुवंति तरसा विघ्नैरविघ्नीकृताः १४ शब्दा
नां जननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे त्वत्तः के
शववासवप्रभृतयोप्याविर्भवंति स्फुटं लीयंते
खलु यत्र कल्पविरमे ब्रह्मादयस्तेप्यमी सा त्वं का
चिदचिंत्यरूपमहिमा शक्तिः परा गीयसे १५ देवा
नां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वरास्त्रैलोक्यं
त्रिपदे त्रिपुष्करमथो त्रिब्रह्मवर्णास्त्रयः यत्किंचि

© Dharmartha Trust J&K. Digitized by eGangotri

जगन्ति त्रियानियमितं वल्ल त्रिवर्गात्मकं नत्संवेत्रि
पुरेतिनाम भगवन्मन्वेतितेनत्वतः १६ लक्ष्मीराज
कुलेजयारणाम्बविन्ह्ये मंकरीमधनि कृष्णादहिपुमर्प
भाजिषावैरी कांतारदुर्गेगिरी भूतप्रेतपिशाचजंबुक
भये स्मृत्वा महाभैरवी व्यामोहे त्रिपुरांतरंतिविपद
स्तारंचनोयज्ञवे १७ मायाकुंडलिनी क्रियामधुम
तीकालीकलामालिनी मातंगीविजयाजयाभगवती
देवीशिवाशांभवी शक्तिः शंकरवल्लभात्रिनयनावाग्
वादिनीभैरवी ह्रींकारीत्रिपुरापरापरमयीमाताकुमा
रीत्यसि १८ आईपल्लविते:परस्परयुते द्विक्रमाद्य
क्षरैः काद्यैःक्षांतगतैः स्वरादिभिरथ क्षांतेश्च तैः सस्वरैः
रैः नामानि त्रिपुरे भवंति खलुयान्यत्यंतगुह्यानि ते
भ्यो भैरवपत्नि विंशतिसहस्रेभ्यः परेभ्यो नमः १९
बोद्धव्यानिपुणंबुधैःस्तुतिरियंकृत्वामनस्तद्गतं भार
त्याःत्रिपुरेतिनन्यमनसोयत्राद्यवृत्तेस्फुरं एकद्वित्रि
पदक्रमेणकथितस्त्वत्पादसंख्याकरैर्मंत्रोद्धारविधि
र्विशेषसहितासत्संप्रदायान्वितः २० सावद्यं निरव
द्यमस्तुयदिवाकिंवानयाचिंतया नूनंस्तोत्रमिदंपठि

© Dharmartha Trust J&K. Digitized by eGangotri

पं.
ल.
२

३

याति नरो यस्यास्ति भक्तिस्त्वयि संचिंत्यापि लघुत्वमात्म
नि दृढं संजायमानं हठात्त्वद्भक्त्या मुखरीकृतेन रचितं य
स्मान्मयापि ध्रुवं २१ इति श्रीपंचस्तव्यां लघुस्तवः प्रथमः
समाप्तः १ ॐ नमस्त्रिपुरसुंदर्यै ॐ आनंदसुंदरपुरंदर
मुक्तमाल्यंमौलौ हठेन निहितं महिषासुरस्य पादांबुजं
भवतु मे विजयाय मंजुमंजीरशिंजितमनोहरमंबिकायाः १
सौंदर्यविभ्रमभुवो भुवनाधिपत्यसंपत्तिकल्पतरवस्त्रि
पुरे जयंति एते कवित्वकुमुदप्रकरावबोधपूर्णेंदवस्त्व
यि जगज्जननिप्रणामाः २ देवि स्तुतिव्यतिकरे कृतबुद्ध
यस्ते वाचस्पतिप्रभृतयोपि जडीभवंति तस्मान्निसर्गज
डिमा कतमोहमत्र स्तोत्रे तव त्रिपुरतापनपत्निकांते ३
मातस्तथापि भवतीं भवतीव्रतापविच्छित्तये स्तुतिम
हार्णवकर्णधारः स्तोत्रं भवानि स भवच्चरणारविंद
भक्तिग्रहः किमपि मां मुखरीकरोति ४ सूते जगंति
भवती भवती बिभर्ति जागर्ति तत्क्षयकृते भवती भवानि
मोहं भिनत्ति भवती भवती रुणद्धि लीलायते जयति
चित्रमिदं भवत्याः ५ यस्मिन्मनागपि नवांबुजपत्रगौरि
गौरि प्रसादमधुरां दृशमादधासि तस्मिन्निरंतरमनं

© Dharmartha Trust J&K. Digitized by eGangotri

गशृंगारप्रकीर्णाःसीमंतिनीनयनसंततयःपतंति ६
शश्वीश्रजोप्पुदयनप्रवरस्यतस्यविद्याधरप्रणतिद्रु
वितपादपीठः यश्चक्रवर्तिपदवीप्रणयःसएषःत्वत्पा
दपंकजरजःकणजःप्रसादः ७ त्वत्पादपंकजरजःप्र
णिपातपूतैःपुण्यैरनल्पमतिभिःकृतिभिःकवींद्रैः ह्री
रत्नपाकरङ्गशूलहिमावदाताकैरप्यवापिभुवनत्रितये
पिकीर्तिः ८ कल्पद्रुमप्रसवकल्पितचित्रपूजामुद्दी
पितप्रियतमामदरक्तगीतिं नित्यंभवानिभवतीमुप
वीणयंतिविद्याधराःकनकशैलगुहागृहेषु ९ लक्ष्मी
वशीकरणकर्मणिकामिनीनामाकर्षणव्यतिकरेषुच
सिद्धमंत्रः नीरंध्रमोहतिमिरच्छिदुरप्रदीपोदेवित्व
दंघ्रिजनितोजयतिप्रसादः १० देवित्वदंघ्रिनखरत्नभु
वोमयूखाःप्रत्यग्रमौक्तिकरुचोमुदमुद्वहंति सेवान
तिव्यतिकरेसुरसुंदरीणांसीमंतसीम्निकुसुमस्तव
कायंतेये ११ मूर्ध्निस्फुरत्तुहिनदीधितिदीप्तिदीप्रं
मध्येललाटममरायुधरश्मिचित्रं हृच्चक्रचारिहुतभु
क्कणिकानुकारिज्योतिर्यदेतदिदमेवपदंत्वदीयं १२
रूपंतवस्फुरितचंद्रमरीचिगौरमालोकतेशिरसिवा

© Dharmartha Trust J&K. Digitized by eGangotri

पं. गद्भिर्देवि तेयः निःसीमसूक्तिरचनामृतनिर्झरस्य तस्य प्र
स्त. सादमधुराः प्रसरंति वाचः १३ सिंदूरपांसुपटलच्छुरिता
४ मिव यो त्वां तेजसा जतुरसस्नपितामिवोर्वीं यः पश्यति क्षण
मपि त्रिपुरे विहाय व्रीडां मृडानि सुदृशस्तमनुद्रवंति १४
५ मातर्मुहूर्तमपि यः स्मरति स्वरूपं लाक्षारसप्रसरतंतुनि
भं भवत्याः ध्यायंत्यनन्यमनसस्तमनंगतप्ताः प्रद्युम्नसीम्नि
सुभगत्वगुणं तरुण्यः १५ योयं चकास्ति गगनार्णवरत्न
मिंदुर्योयं सुरासुरगुरुः पुरुषः पुराणः यद्वाममर्धमिद
मंधकसूदनस्य देवि त्वमेव तदिति प्रतिपादयंति १६ इच्छा
नुरूपमनुरूपगुणप्रकर्षसंकर्षिणि त्वमभिरूपतया यदा विश्व
र्विं जायते स त्रिभुवनैकगुरुस्तदानीं देवः शिवोपि भुवन
त्रयसूत्रधारः १७ ध्यातासि हैमवति येन हिमांशुरश्मि
मालामलद्युतिरकल्मषमानसेन तस्याविलंबमनवद्य
मनंतकल्पमल्पैर्दिनैः सृजसि सुंदरि वाग्विलासं १८
आधारमारुतनिरोधवशेन येषां सिंदूररंजितसरोज
गुणानुकारि दीप्तं हृदि स्फुरति देवि वपुस्त्वदीयं ध्या
यंति तान्विहसमीहितसिद्धसाध्याः १९ ये चिंतयंत्य
रुणमंडलमध्यवर्ति रूपं तवांब नवयावकपंकपिंगं

© Dharmartha Trust J&K. Digitized by eGangotri

तेषां सदैव कुसुमायुधबाणभिन्नवक्षस्थला मृगदृ।
शो वशगा भवंति २० त्वामैंदवीमिव कलामनुभालदे
शमुद्भासितांवरतलामवलोकयंतः सद्यो भवानि सु
धियः कवयो भवंति त्वं भावनाहितधियां कुलकामधेनुः २८
शर्वाणि सर्वजनवंदितपादपद्मे पद्मच्छदच्छविविडंबितने
त्रलक्ष्मि निष्पापमूर्तिजनमानसराजहंसि हंसि त्वमा
पदमनेकविधां जनस्य २१ त्वं व्यापिनीति सुमना इति।
कुंडलीति त्वं मालिनीति कमलेति कलावतीति त्वं का।
मिनीति ललितेत्यपराजितेति देवि स्तुति विजयेति जये
उमेति २३ उद्दामकामपरमार्थसरोजषंडचंडद्युतिद्यु
तिमुपासितषट्प्रकारां मोहद्विपेंद्रकदनोद्यतबोध
सिंहलीलागुहां भगवतीं त्रिपुरां नमामि २४ गणेश
वटुकस्तुतरतिसहायकामान्विता स्मरारिवरविष्ट
रा कुसुमबाणबाणैर्युता अनंगकुसुमादिभिः परि
वृता च सिद्धैस्त्रिभिः कदंबवनमध्यगा त्रिपुरसुंदरी
पातु नः २५ उन्मत्तहेमरुचिरे त्रिपुरे पुनीहि चेतश्चि
रंतनमघौघवनं लुनीहि कारागृहे निगडबंधनयंत्रि
तस्य त्वत्संस्मृतौ झटिति मे निगडास्त्रुटंतु २६ रुद्रा

© Dharmartha Trust J&K. Digitized by eGangotri

पं. णा विद्रुममयी प्रतिमामिव त्वां ये चिंतयंत्यरुणकां
स्त. तिमनन्यरूपां तानेत्य पक्ष्मलदृशः प्रसभं भजंते कंठाव
५ सक्तमृदुबाहुलतास्तरुण्यः २७ त्वद्रूपमुल्लसितदाडि
मपुष्परक्तमुद्भावयेन्मदनदेवतमक्षरं यः तं रूपहीनम
पि मन्मथनिर्विशेषमालोकयंत्युरुनितंबतटास्तरुण्यः २८
त्वद्रूपैकनिरूपणप्रणयिता बंधे दृशोस्त्वद्गुणग्रामाक
र्णनरागिता श्रवणयोस्त्वत्संस्मृतिश्चेतसि त्वत्पादार्चन
चातुरी करयुगे त्वत्कीर्तनं वाचि मे कुत्रापि त्वदुपासना
व्यसनिता मे देवि मा शाम्यतु २९ यः स्तोत्रमेतदनुवास
रमीश्वरायाः श्रेयस्करं पठति वा यदि वा शृणोति तस्ये
प्सितं फलति राजभिरीड्यतेसौ जायेत स प्रियतमो मद
रेक्षणानां ३० ब्रह्मेंद्ररुद्रहरिचंद्रसहस्ररश्मिस्कंद
द्विपाननहुताशनवंदितायै वागीश्वरि त्रिभुवनेश्व
रि विश्वमातरंतर्बहिश्च कृतसंस्थितये नमस्ते ३१
इति श्रीपंचस्तव्यां द्वितीयो घटस्तवः संपूर्णः ॥
ॐ नमस्त्रिपुरसुंदर्यै ॐ देवि त्र्यंबकपत्नि पार्वति सति
त्रैलोक्यमातः शिवे शर्वाणि त्रिपुरे मृडानि वरदे रुद्राणि
कात्यायनि भीमे भैरवि चंडि शर्वरि कले कालक्षये शू
लिनि

© Dharmartha Trust J&K. Digitized by eGangotri

त्वत्पादप्रणतानन्यमनसः पर्याकुलात्मा हि नः १
देवि त्वां सकृदेव यः प्रणमति क्षोणीभृतस्तं नमन्त्याजन्म
स्फुरदंघ्रिपीठविलुठत्कोटीरकोटिच्छटाः यस्त्वामर्चति
सोऽर्च्यते सुरगणैर्यः स्तौति संस्तूयते यस्त्वां ध्यायति तं स्म
रार्तिविधुरा ध्यायंति सिद्धांगनाः २ उन्मत्ता इव सग्रहा
इव विषव्यासक्तमूर्छा इव प्राप्तप्रौढमदा इवार्तिविरहग्र
स्ता इवार्ता इव ये ध्यायंति हि शैलराजतनयां धन्यास्तए
काग्रतस्तमोपाधिविमुक्तरागमनसो ध्यायंति वामभ्रुवः ३
ध्यायंति ये क्षणमपि त्रिपुरे हृदि त्वां लावण्ययौवनघनैर
पि विप्रयुक्ताः ते विस्फुरंति ललितायतलोचनानां चित्तै
कभित्तिलिखितप्रतिमाः पुमांसः ४ यत्तं किंनु हरप्रि
याम्बुजविशालमत्संगमंगैर्निजैः किंवांसेनिगलाम्पनेन
तहसा किंवैकतामाश्रये नस्पत्थ्वि वशो विकल्पघटना
कूतेनियोषिज्जनः किं तद्यत्न करोति देवि हृदये यस्य त्व
मावर्तसे ५ विश्वव्यापिनि यद्वदीश्वर इति स्थाणावनन्याश्र
यः शब्दः शक्तिरिति त्रिलोकजननि त्वय्येव तथ्यस्थि
तिः इत्थं सत्यपि शक्नुवंति यदिमाः स्वद्वारुजो वाचयितुं
तद्वक्तानपि नत्वणोषिचरुषानत्दे विचित्रं महत् ६

© Dharmartha Trust J&K. Digitized by eGangotri

पं॰
ल॰
८

इंदोर्मध्यगतां मृगांकसदृशच्छायां मनोहारिणीं पांडूत्फु
ल्लसरोरुहासनगतां स्निग्धप्रदीपच्छविं वर्षंतीममृतं भ
वानि भवतीं ध्यायंति ये देहिनस्ते निर्मुक्तरुजो भवंति विप
दः प्रोज्झंति तान्दूरतः ७ पूर्णेंदोः शकलैरिवातिबहलैः
पीयूषपूरैरिव क्षीराब्धेर्लहरीभरैरिव सुधापंकस्य पिं
डैरिव प्रालेयैरिव निर्मितं तव वपुर्ध्यायंति ये देहिनस्ते
षांतर्निहन्ताति तापविपदस्ते संपदं बिभ्रति ८ ये संस्म
रंति तरलां सहसोल्लसंतीं त्वां ग्रंथिपंचकभिदं तरुणा
र्कशोणां रागार्णवे वकुलराशिनिमज्जयंतीं कृत्स्नं जगद्
यति चेतसि नान्मृगाक्षि ९ लाक्षारसप्रसरपंकजतंतु
तन्वीमंतःस्मरंत्यनुदिनं भवतीं भवानि ये संस्मरप्रतिम
प्रतिमस्वरूपा नेत्रोत्पलैर्मृगदृशो भृशमर्चयंति ११ स्व
मस्त्वां वाचमव्यक्तां हिमकुंदेंदुरोचिषं कदंबमालावि
भ्राणामापादतललंबिनीं १२ मूर्ध्नीन्दोः सितपंकजास
नगतां प्रालेयपांडुत्विषां वर्षंतीममृतं सरोरुहभुवोव
क्त्रेपि रंध्रेपि च प्रच्छिन्नां च मनोहरां च ललितां चाति
प्रसन्नापि च त्वामेव स्मरतः स्मरारिदयिते वाक्सर्वतो
वल्गाति १३ दरान्तोष्ठाम्भोगाल्लपयति रिपून्दंति विप

वे

© Dharmartha Trust J&K. Digitized by eGangotri

दो दर्हस्ता थीर्थी थी त्वमयति स्वखानि प्रतनुते हृष्टा
दंतर्ङ्खं दलयति पिनष्टीष्टविरह्ं सक्रुद्धानादेवीकि
मिव निरवद्यं प्रकृतते १४ यस्त्वां ध्यायति वेत्ति विंदति ज
पत्यालोकते चिंतयत्यन्वेति प्रतिपद्यते कलयति स्तौत्या
श्रयत्यचेति यश्चत्र्यंबककवल्लभे न वशगणनाकर्णयत्या
दरात्तस्य श्रीर्न गृहादपैति विजयस्तस्याग्रतो धावति १५
किं किं दुःखं दनुजदलिनि क्षीयते न स्मृतायां का का की
र्तिं कुलकमलिनि ख्यापिते न स्नुतायां का का सिद्धिः
सुरवरनुते प्राप्यते नार्चितायां कं कं योगं त्वयि न चित्त
ते चित्तमालंबितायां १६ ये देवि दुर्धरकृतांतमुखांत
रस्था ये कालिकालयनपाशनितांतबद्धाः ये चंडि चंड
गुरुकल्मषसिंधुमग्नास्तान्पासि मोचयसि तारयसि
स्मृतैव १७ लक्ष्मीवशीकरणहूर्णसहोदराणि त्वत्पादपं
कजरजांसि चिरं जयंति यानि प्रणाममिलितानि नृणां
ललाटे लुंपंति दैवलिखितानि दुरक्षराणि १८ रे मूढाः
किमयं हृथैव तपसा कायः परिक्लिश्यते यज्ञैर्वा वहुदक्षि
णैः किमितरैरिक्ताः क्रियंते गृहाः भक्तिश्चेदविनाशिनी
भगवतीपादद्वयीसेव्यतां स्वन्निद्रांबुरुहासनपद्मसुभगा

© Dharmartha Trust J&K. Digitized by eGangotri

पं० च० ८

लक्ष्मीपुरोयावति १९ याचेनकंचननकंचनवंचयामि
सेवेनकंचननिरस्तसमस्तदैन्यः श्लक्ष्णावसेमधुरम
ङ्किभजेवरस्त्रीदेवीहृदिस्फुरतिमेकुलकामधेनुः २०
इतिश्रीपंचस्तव्यांचर्चास्तवःतृतीयः ३ ॥
ॐनमस्त्रिपुरसुंदर्यै ॐयामामनंतिमुनयःप्रकृतिंपु
राणींविद्येतियांश्रुतिरहस्यविदोवदंति तामर्धपल्लवित
शंकररूपमुद्रांदेवीमनन्यशरणःशरणंप्रपद्ये १ अंब
स्तवेषुतवतावदकृत्रिमाणिकुंठीभवंतिवचसामपिगुं
फनानि डिंभस्यमेस्तुतिरसावसमंजसापिवात्सल्यनि
घ्नहृदयंभवतींधिनोतु २ व्योमेतिबिंदुरितिनादइतींदु
लेखारूपेतिवाग्भवतनूरितिमातृकेति निष्यंदमानसु
खबोधसुधास्वरूपाविद्योतसेमनसिभाग्यवतांजनानां ३
आविर्भवत्पुलकसंततिभिःशरीरैर्निष्यंदमानसलि
लैर्नयनैश्चनित्यं वाग्भिश्चगद्गदपदाभिरुपासतेयेपा
दौतवांबभुवनेषुतएवधन्याः ४ वक्त्रंयदुद्यतमभिष्टु ३
तयेभवत्यास्तुभ्यंनमोयदपिदेविशिरःकरोति चेतश्च
यत्त्वयिपरायणमंबतानिकस्यापिकैरपिभवंतितपो
विशेषैः ५ मूलालवालकुहराद्दितनाभवानिनिर्भि

© Dharmartha Trust J&K. Digitized by eGangotri

यथस्मरसि जानि तडिल्लतेव भूयोपि तत्र विगमासि ध्रुव
मंडलेंदुनिष्यंदमानपरमामृततोयरूपा ६ दृग्यं यदाम
दनमेकमनेकधा तेस्तुग्यः कटाक्षविपरिं क्ररयां चकार
यत्तेनदाग्रश्रुतिदेविललाटनेत्रसंस्ं क्रियेव मुकुलीकृत
मिंदुमौलिः ७ अज्ञातसंभवमनाकलितान्ववायं भिक्षैक
पालिनमवाससमद्वितीयं एवं करग्रहणमंगलतो भव।
त्याशंभुं कपर्वद्रूपे गिरिराजकन्ये ८ चर्मांवरं च शवभ
स्मविलेपनं च भिक्षाटनं च नटनं च परीतभूमौ वेतालसं
हतिपरिग्रहता च शंभोः शोभां विभर्ति गिरिजे तव साह।
वर्धात चार्य ९ कल्पोपसंहरणकेलिषु पंडितानि चेडानि खंड
परशोरपि तांडवानि आलोकनेन तव कोमलितानि मा
तर्लीस्यात्मना परिणमंति जगद्विभूत्यै १० जेनोरपश्चि
मतनोः सतिकर्मसाम्ये निःशेषपाशपटलछिदुरा निमे
षात् कल्याणि देशिककटाक्षसमाश्रयेण कारुण्यव
तो भवसि शांभववेधदीक्षा ११ शङ्काविभूषणवनी
नवविद्रुमाभा यस्यान्तसिस्फुरसि तारकितेव संध्या प
कः स एव भुवनत्रयसुंदरीणां कंदर्पतां व्रजति पंचशरी
विनापि १२ ये भावयंत्यमृतवाहिभिरंशुजालैराप्या
यमानभुवनाममृतेश्वरीं त्वां ते लंघयंति नरमातर

© Dharmartha Trust J&K. Digitized by eGangotri

पं. लेखनीयं ब्रह्मादिभिः स्वरवैरपि कालकण्ठं ॥ १३ ॥ यः स्फा
स्त. टिकाक्षगुणपुस्तककुण्डिकाढ्यां व्याख्यासमुद्यतकरां श
८ रदिन्दुशुभ्रां पद्मासनां च हृदये भवतीमुपास्ते मातः स वि
8 श्वकवितार्किकचक्रवर्ती १४ बर्हावतंसयुतबर्बरकेश
पाशां गुञ्जावलीकृतघनस्तनहारशोभां श्यामां प्रवालव
दनां सुकुमारहस्तां त्वामेव नौमि शबरीं शबरस्य जायां १५
अर्धेन किं नवलताललितेन मुग्धे क्रीतं विभोः परुषमर्ध
मिदं त्वयेति आलीजनस्य परिहाससवचांसि मन्ये मंदस्मिते
न तव देवि जडी भवंति १६ ब्रह्मांडबुद्बुदकदंबकसंकुलो
यं मायोदधिर्विविधदुःखतरंगमालः आश्चर्यमंब^झडि झ
ति प्रलयं प्रयाति त्वद्ध्यानसंततिमहावडवामुखाग्नौ १७
दाक्षायणीति कुटिलेति कुहारिणीति कात्यायनीति कमले
ति कलावतीति एका सती भगवती परमार्थतोपि संदृश्य
से बहुविधा ननु नर्तकीव १८ संकोचमिच्छसि यदा गि
रिजे तदानीं वाक्तर्कयोस्त्वमसि भूमिरनामरूपा यद्वा वि
कासमुपयासि यदा तदानीं त्वन्नामरूपगणनाः सुकरी भ
वंति १९ भोगाय देवि भवतीं कृतिनः प्रणम्य भ्रूकिंकरीकृत
सरोजगृहाः सहस्रं चिंतामणिप्रचयकल्पितकेलिशै
ले कल्पद्रुमोपवनमप्सरसो रमंते २० हत्वा त्वमेव भवसि

© Dharmartha Trust J&K. Digitized by eGangotri

त्वदधीनमीशे संसारतापमखिलं दययापनुन्नं ॥
वैकर्तनीकिरणसंहृतिरेवशार्वाचर्मेनिजंशमयितुं
निजयैवतृष्णा २१ शक्तिःशरीरमधिदैवतमंतरात्मा
ज्ञानंक्रियाकरणमासनजालमिच्छा ऐश्वर्यमायतन
मावरणानिचत्वंकिंतन्नयद्भवसिदेविशशांकमौलेः २२
क्ष्मोनिवृत्तिरुदितापयसिप्रतिष्ठाविद्यानलेमहतिशां
तिरतीतशांतिः व्योम्नीतियाःकिलकलाःकलयंतिवि
श्वंतासांविहारनरमेवपदंत्वदीयं २३ आनंदलक्षणमना
हतनाम्निदेशेनादात्मनापरिणतंतवरूपमीशे प्रत्यङ्मुखे
नमनसापरिचीयमानंशंसंतिनेत्रसलिलैःपुलकैश्चयस्याः २४
त्वंचंद्रिकाशशिनितिग्मरुचौरुचिस्त्वंत्वंचेतनासिपुरुषे
पवनेबलंत्वं त्वंस्वादुतासिसलिलेशिखिनित्वमूष्मानिःसा
रमेवनिखिलंत्वदृतेयदिस्यात् २५ ज्योतींषियद्दिविचरंति
यदंतरिक्षंसूतेपयांसियदहिर्धरणीचधत्ते यद्वातिवायुर
नलोयदुदर्चिरास्तेतत्सर्वमेवतवकेवलमाज्ञयैव २६ या
वत्पदंपदसरोजयुगंत्वदीयंनांगीकरोतिहृदयेषुजगच्छर
ण्ये तावद्विकल्पजटिलाःकुटिलप्रकारास्तर्कग्रहाःसमयि
नांप्रलयंनयांति २७ यद्देवयानपितृयानविहारमेकी
कृत्वामनःकरणमंडलसार्वभौमं ध्यानेनिवेश्यनवकारण
पंचकस्यपर्वाणिपार्वतिनयंतिनिजासनत्वं २८ स्थूलासु

© Dharmartha Trust J&K. Digitized by eGangotri

पं॰ मूर्तिंशुभमहीप्रसृतोत्तमूर्तेः कस्याश्च नापि तव वैभवमंबय
स्त॰ स्याः पश्यागिरामपि न शक्यत एव वक्तुं सा सिद्धनाकिलम
९ येति निनितिहितवं १९ कालाग्निकोटिरुचिमंब षडध्वशुद्धा।
वाह्यावनेषु भवतीममृतौघवृष्टिं श्यामां च नस्तननतं सक।
लीकृतौ च ध्यायंत एव जगतां गुरवो भवंति २०· विद्यापरां क
तिचिदंबरमंब केचिदानंदमेव कतिचित्कतिचिच्च मायां वो
विश्वमाकुरपरेवयमामनाम साक्षादपारकरुणां गुरुमूर्ति
मेव २१ कुवलयदलनीलं वर्वरस्निग्धकेशं पृथुतरकुचभारा
क्रांतकांतावलग्नं किमिह बहुभिरुक्तैस्त्वत्स्वरूपं परं नः सक
लजननि मातः संततं सन्निधत्तां २२ इति श्रीपंचस्तव्यां माजी
न चतुर्थस्तवः समाप्तः॥ ॐ नमः श्रीगुरसंविदे। ॐ प्रजानंतो
यांति त्रयमवशमन्योन्यकलहैरमी मायाग्रंथौ तव परिलुठं
तः समयिनः जगन्मातर्जन्मज्वरभयतमःकौमुदि वयं न।
मस्ते कुर्वाणाः शरणमुपयामो भगवतीं १ वचस्तर्कागम्य
स्वरसपरमानंदविभव प्रबोधाकाराय द्युतितुलितनीलो
मलरुचे शिवस्फाराध्याय स्तनभरविनम्राय सततं नमो य
स्मै कस्मैचन भवतु मुग्धाय महसे २ मिथः केशाकेशि प्र
थननिधनास्तर्कघटना बहुश्रद्धाभक्तिप्रवणविषयाश्चाम
विषयः प्रसीद प्रत्यक्षीभव गिरिसुते देहि शरणं निरालंबे
चेतः परि[illegible]मिदं ३ [illegible]केवारवगप

© Dharmartha Trust J&K. Digitized by eGangotri

रिपदोवायदर्शनं कदाकेन केनापि क्वचिदपिनकश्चित्कल
यति ग्रसत्यसि निःश्वासं विजहिहि ममाक्रायवपुषिश्रयद्ये
ष्याश्चेतः सकलजननीमेवशरणं ४ अनाद्यंताभेदप्रणयर
सिकापिप्रणयिनी शिवस्यासीर्थं त्वं परिणयविधौ देविगृहि
णी सविशीनानामपियदुदभूः शैलतनयातदेतत्संसारप्र
णयनमहानाटकसुखं ५ त्वमेकेनत्वं भगवतिसदेकोविदु
रमतत्वेमातः श्रातृस्तवसदसदंत्येतककवयः परेनैनत्संवेस
मभिदधतेदेविसुधियस्तदेतज्जन्मायाविलसितमशेषंनत्व
शिवे ६ नदिक्कोटिज्योतिर्द्युतिदलितषड्ग्रंथिगहनं प्रवि
ष्टस्वाधारंपुनरपिसुधावृष्टिवपुषा किमप्यष्टाविंशत्किरण
सकलीभूतमनिशं भजेधामश्यामंकुचभरनतंबर्बरकचं ७
चतुष्पत्रांतः षड्दलभगपुरांतः त्रिवलयास्फुरद्विद्युद्वह्नि
द्युमणिनियताभद्युतिपुते षडस्रंभित्वादौ दशदलमथद्वा
दशार्द्धंलेकलाष्टौच द्व्यष्टौगगनवतिनमस्ते गिरिसुते ८ कु
लेकेचित्स्वात्कुंडपुरकुलमंत्येनवपुषाः परेतत्संभेदंसमभि
दधतेकौलमपरे चतुर्णामप्येषामुपरिकिमपिप्राहुरपरे
महामायेतत्वं तवकथममीनिश्चिनुमहे ९ षडुहारगणानी
प्रलयरविकोटिप्रतिरुचारुचाभस्मीकृत्यस्वपदकमलप्र
ह्वशिरसां वितन्वानः शैवं किमपिवपुरिंदीवररुचिः कु
चाभ्यामानम्रः शिवपुरुषकारोविजयते १० प्रकाशानंदा

© Dharmartha Trust J&K. Digitized by eGangotri

पं. ध्यामतिदितचरीमध्यपदवीप्रविश्यैतन्हुंहूं रविशशिसमा
स्त. त्वांकवलयं प्रविश्योर्ध्वनादं लयदहनभस्मीकृतकलाश्रमा
१० शान्तेजेनः शिवमकलमेवप्रविशति ११ मनुष्यास्तिर्यंचोमरु
तइति लोकत्रयमिदं भवांभोधौमग्नंत्रिगुणलहरीकोटिलु
ठितं कटाक्षश्चेदत्रक्कचनतवमातः करुणयाशरीरेसद्योयं
व्रजतिपरमानंदतनुतां १२ प्रियंगुश्यामांगीमरुणतरवा
सःकिसलयांसमुन्मीलन्मुक्ताफलवहलनेपथ्यकसमां
तनद्वंद्वस्फारस्तवकनमितांकल्पलतिकांसकृद्ध्यायंतस्त्वांद
हतिशिवचिंतामणिपदं १३ षडाधारावर्तैरपरिमितमंत्रोर्मिप
टलेस्खलन्मुद्राफेनैर्वहुविधलसद्दैवतझषैः क्रमस्रोतोभिस्त्वं
वहसिपरनादामृतनदीभवानि प्रत्यग्राशिवविदमृताब्धिप्र
णयिनी १४ महीपाथोवह्निश्वसनवियदात्मेंदुरविभिर्वपु
र्भिन्नैर्लोकेशैरपिनवक्रियानस्वमहिमा प्रसूयालोकांतेभगव १५
तिनकश्चाप्यनुत्तरामवस्थांप्राप्तानित्वयितुपरमव्योमवपुषि
कलांप्रज्ञासाध्यांसमयमनुभूतिंसमरसांगुरूपारंपर्यविनय
मुपदेशंशिवकथां प्रमाणंनिर्वाणंपरममनुभूतिंपरगुहां
विधिंविद्यामाहुःसकलजननीमेवमुनयः १६ प्रलीनेशब्दौ
घेतदनुविरतेबिंदुविभवेततस्तत्त्वेचाष्टध्वनिवपुरूपापि
न्तुपगाते स्थितेशाक्तेपदेएषत्रकलितचिन्मात्रगहनांस्वसं
विनिंयोगीरसवलितितानालांपरतंत्रे १७ परानंदाकारांनिर

© Dharmartha Trust J&K. Digitized by eGangotri

वपुःशिवेस्वयंवपुषं निराकाराज्ञानप्रकृतिमपरिच्छिन्नक
रुणं सवित्रीलोकानांनिरतिशयधामास्पदपदं भवोवामो
ह्नोवाभववत्भवतीमेवभजतां १८ जगत्कार्येकृत्वातदपिहृ
दयेतस्यवपुषे ऊर्मांसविंदुस्यतदपिवियदाख्येचगहनेतदे
तज्ज्ञानाख्येतदपिपरमानंदगहने मह्याश्रीमात्रेतदनुभ
वतीतोविजयते १९ विधेवेद्येविद्येविविधसमयेवचशलि
केविविधेविद्याद्येविनयसुलभेवेदजननि शिवस्तेशूलस्थे
शिवपदवदन्येशिवनिधेशिवेमानमेसंत्वयिविनतभक्तिनि
रुपमा २० विधेर्मुंडंहत्वायदकुरुतपाणौकरतलेहरिःशूल
प्रोतंयदगमयदस्याभरणतां भूलंवकेकंठेयदपिगरलंता
वगिरिशःशिवस्यायाःशक्तेस्तदिदमखिलंतेविलसितं २१
विरिंचाख्यामातःसृजसिहरिसंज्ञात्वमवसित्रिलोकींरुद्रा
ख्याहरसिविदधासीश्वरपदं भवंतीसादाख्याशिवयसि
चपाशौघदलनीत्वमेवैकानेकाभवसिकृतभेदैर्गिरिसुते २२
मुनीनांचेतोभिःप्रमृदितकषायैरपिमनागशक्यैःसंस्प्रष्टुं
चकितचकितैरंवसततं श्रुतीनांमूर्धानःप्रकृतिकठिनाः
कोमलतरेकथंतेविंदंतेपदकिसलयेपार्वतिपदं २३ तडि
दुल्लीनित्याममृतसरितेपारिहितां मलोत्तीर्णांज्योत्स्नां
प्रकृतिमगुणग्रंथिगहनां गिरांदूरांविद्यामविनतकुचांवि
श्वजननीमपर्यंतांलक्ष्मीमभिदधतिसंतोभगवतीं २४

पं. शरीरं क्षित्यम्भःप्रभृतिरचितं केवलमिदं सुखं दुःखं चायं कल
स्त. यति पुमांश्चेतन इति स्फुटं जानानोऽपि प्रभवति न देही रहयि
॥ तुं शरीराहंकारं तव समयबाह्यो गिरिसुते २५ पिता माता भ्रा
ता सुहृदनुचरः सद्म गृहिणी वपुः पुत्रो मित्रं धनमपि यदा मां
विजहति तदा मे भिन्दाना सपदि भयमोहान्धतमसं महाज्योत्स्ने
मातर्भव करुणया सन्निधिकरी २६ सुता दक्षस्यादौ किल स
कलमातस्त्वमुदभूः सदोषं तं हित्वा तदनु गिरिराजस्य तनया
वां अनाद्यन्ताभेदप्रणयरसिकापि प्रणयिनी विहारायासीत्त्व
महह चरितं वेत्ति तव कः २७ कणास्त्वद्दीप्तीनां रविशशिकृशा
नुप्रभृतयः परं ब्रह्म क्षुद्रं तव नियतमानन्दकणिका शिवादि
क्षित्यन्तं त्रिवलयतनोः सर्वमुदरे तवास्ते भक्तस्य स्फुरसि हृदि
चित्रं भगवति २८ पुरः पश्चादन्तर्बहिरपरमेयं परमितं परं स्थू
लं सूक्ष्मं सकलमकलं गुह्यमगुह्यं दवीयो नेदीयः सदसदिति
विश्वं भगवती सदा पश्यन्त्याख्यां वहसि भुवनक्षोभजननी २९
प्रविश्य त्वन्मार्गं सहजदयया देशिकदृशा षडध्वध्वान्तौघच्छि
दुरगणनातीतकरुणां परामाज्ञाकारां सपदि शिवयन्तीम
पि तनुं स्वमात्मानं यस्याः स्थिरमुपलभन्ते भगवती ३० मयूखाः
रवीव ज्वलन इव दीप्तिकणिकाः पयोधौ कल्लोलाः प्रति
हतमहिम्नीव पृषताः उदेत्योदेत्यान्तस्त्वयि मनु निजे लान्ति विक
लैर्भजन्ते तन्त्रौघाः प्रशममनुकम्पे परवशाः ३१ विधौ वि

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वज्ञः प्रकृतिरगुणात्मा दिनकरः स्वभावो जैनेन्द्रः सुग
तस्तु निराकाशमनिलः शिवः शक्तिश्चेति श्रुतिविषयना
मभ्युपगतो विकल्पैरभिस्त्वामभिदधति सन्तो भगवती १२
शिवस्त्वं शक्तिस्त्वं त्वमसि समयास्त्वं समयिनी त्वमात्मा त्वं दी
क्षा त्वमणिमादिर्गुणगणः अविद्या त्वं विद्या त्वमसि निखिलं
त्वमपरं पृथक्कृत्वं तत्त्वं भगवति न वीक्षामह इमे १३ त्वया
योगी नीते रचयति भवत्सेव सततं त्वयैवेच्छा सैव त्वमसि
निखिलायत्तनवः गतः साम्यं शंभुर्वहति परमं व्योम भ
वन्ती त्वद्धाम्ने वे हित्वा विहरति शिवस्येति किमिदं १४ अ
संख्यैः प्रावीनैः जननिजननैः कर्मनिलयात् कृते जन्मन्ये
नेश्वरतत्त्वमासाद्य गिरिशं अवाप्यान्ते शैवीं क्रमतनु
रपि त्वां विदितवान् न ये यं त्वत्पूजास्तु नि विरचनैरेव
दिवसान् १५ यत्माद्यं त्रेकमलमुदितं तस्य याक
र्णिका व्योमयोनिस्तस्याः प्रथितमुदरे यन्त्रदोंका
रपीठम् तस्मिन्नन्तः कुचभरनतां कुंडली त्वां प्र
हत्वं प्रूपामाकारां सकलजननीं संततं भाव
यामि १६ भुवि पयसि कृशाणौ मारुते खे शशां
के सवितरि यजमाने प्यष्टधा शक्तिरेका वह
सि कुचभराभ्यां यावनम्रावलग्नं सकलजन
नि सा त्वं याहि मामित्यवश्यम् १७ इति श्रीपंच

© Dharmartha Trust J&K. Digitized by eGangotri

पं. स्त. ११

वां

२५८

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

पं.
स्ल.
११

वाँ

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

सं० १२२

© Dharmartha Trust J&K. Digitized by eGangotri